# Bhishmakritam 2 Shri Krishna Stotram

# ભીષ્મકૃતં ૨ શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Bhishmakritam 2 Shri Krishna Stotram

File name : bhIShmakRRitaM2shrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | shAntiparva | adhyAya 47/10-63||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# ભીષ્મકૃતં ૨ શ્રીકૃષ્ણસ્તોત્રમ્

કૃતાઞ્જલિઃ શુચિર્ભૂત્વા વાગ્વિદાં પ્રવરઃ પ્રભુમ્ ।
ભીષ્મઃ પરમધર્માત્મા વાસુદેવમથાસ્તુવત્ ॥ ૯॥

આરિરાધયિષુઃ કૃષ્ણં વાચં જિગમિષામિ યામ્ ।
તયા વ્યાસસમાસિન્યા પ્રીયતાં પુરુષોત્તમઃ ॥ ૧૦॥

શુચિઃ શુચિષદં હંસં તત્પરઃ પરમેષ્ઠિનમ્ ।
યુક્ત્વા સર્વાત્મનાઽઽત્માનં તં પ્રપદ્યે પ્રજાપતિમ્ ॥ ૧૧॥

યસ્મિન્વિશ્વાનિ ભૂતાનિ તિષ્ઠન્તિ ચ વિશન્તિ ચ ।
ગુણભૂતાનિ ભૂતેશે સૂત્રે મણિગણા ઇવ ॥ ૧૨॥

યસ્મિન્નિત્યે તતે તન્તૌ દૃઢે સ્રગિવ તિષ્ઠતિ ।
સદસદ્ગ્રથિતં વિશ્વં વિશ્વાઙ્ગે વિશ્વકર્મણિ ॥ ૧૩॥

હરિં સહસ્રશિરસં સહસ્રચરણેક્ષણમ્ ।
પ્રાહુર્નારાયણં દેવં યં વિશ્વસ્ય પરાયણમ્ ॥ ૧૪॥

અણીયસામણીયાંસં સ્થવિષ્ઠં ચ સ્થવીયસામ્ ।
ગરીયસાં ગરિષ્ઠં ચ શ્રેષ્ઠં ચ શ્રેયસામપિ ॥ ૧૫॥

યં વાકેષ્વનુવાકેષુ નિષત્સૂપનિષત્સુ ચ ।
ગૃણન્તિ સત્યકર્માણં સત્યં સત્યેષુ સામસુ ॥ ૧૬॥

ચતુર્ભિશ્ચતુરાત્માનં સત્ત્વસ્થં સાત્વતાં પતિમ્ ।
યં દિવ્યૈર્દેવમર્ચન્તિ ગુહ્યૈઃ પરમનામભિઃ ॥ ૧૭॥

યં દેવં દેવકી દેવી વસુદેવાદજીજનત્ ।
ભૌમસ્ય બ્રહ્મણો ગુપ્ત્યૈ દીપ્તમગ્નિમિવારણિઃ ॥ ૧૮॥

યમનન્યો વ્યપેતાશીરાત્માનં વીતકલ્મષમ્ ।
ઇષ્ટ્વાનન્ત્યાય ગોવિન્દં પશ્યત્યાત્મન્યવસ્થિતમ્ ॥ ૧૯॥

પુરાણે પુરુષઃ પ્રોક્તો બ્રહ્મા પ્રોક્તો યુગાદિષુ ।
ક્ષયે સઙ્કર્ષણઃ પ્રોક્તસ્તમુપાસ્યમુપાસ્મહે ॥ ૨૦॥

અતિવાય્વિન્દ્રકર્માણમતિસૂર્યાગ્નિતેજસમ્ ।
અતિબુદ્ધીન્દ્રિયાત્માનં તં પ્રપદ્યે પ્રજાપતિમ્ ॥ ૨૧॥

યં વૈ વિશ્વસ્ય કર્તારં જગતસ્તસ્થુષાં પતિમ્ ।
વદન્તિ જગતોઽધ્યક્ષમક્ષરં પરમં પદમ્ ॥ ૨૨॥

હિરણ્યવર્ણં યં ગર્ભમદિતિર્દૈત્યનાશનમ્ ।
એકં દ્વાદશધા જજ્ઞે તસ્મૈ સૂર્યાત્મને નમઃ ॥ ૨૩॥

શુક્લે દેવાન્પિતૄન્કૃષ્ણે તર્પયત્યમૃતેન યઃ ।
યશ્ચ રાજા દ્વિજાતીનાં તસ્મૈ સોમાત્મને નમઃ ॥ ૨૪॥

મહતસ્તમસઃ પારે પુરુષં જ્વલનદ્યુતિમ્ ।
યં જ્ઞાત્વા મૃત્યુમત્યેતિ તસ્મૈ જ્ઞેયાત્મને નમઃ ॥ ૨૫॥

યં બૃહન્તં બૃહત્યુક્થે યમગ્નૌ યં મહાધ્વરે ।
યં વિપ્રસઙ્ઘા ગાયન્તિ તસ્મૈ વેદાત્મને નમઃ ॥ ૨૬॥

ઋગ્યજુઃસામધામાનં દશાર્ધહવિરાકૃતિમ્ ।
યં સપ્તતન્તું તન્વન્તિ તસ્મૈ યજ્ઞાત્મને નમઃ ॥ ૨૭॥

યઃ સુપર્ણો યજુર્નામ છન્દોગાત્રસ્ત્રિવૃચ્છિરાઃ ।
રથન્તરબૃહત્યક્ષસ્તસ્મૈ સ્તોત્રાત્મને નમઃ ॥ ૨૮॥

યઃ સહસ્રસવે સત્રે જજ્ઞે વિશ્વસૃજામૃષિઃ ।
હિરણ્યવર્ણઃ શકુનિસ્તસ્મૈ હંસાત્મને નમઃ ॥ ૨૯॥

પદાઙ્ગં સન્ધિપર્વાણં સ્વરવ્યઞ્જનલક્ષણમ્ ।
યમાહુરક્ષરં નિત્યં તસ્મૈ વાગાત્મને નમઃ ॥ ૩૦॥

યશ્ચિનોતિ સતાં સેતુમૃતેનામૃતયોનિના ।
ધર્માર્થવ્યવહારાઙ્ગૈસ્તસ્મૈ સત્યાત્મને નમઃ ॥ ૩૧॥

યં પૃથગ્ધર્મચરણાઃ પૃથગ્ધર્મફલૈષિણઃ ।
પૃથગ્ધર્મૈઃ સમર્ચન્તિ તસ્મૈ ધર્માત્મને નમઃ ॥ ૩૨॥

યં તં વ્યક્તસ્થમવ્યક્તં વિચિન્વન્તિ મહર્ષયઃ ।
ક્ષેત્રે ક્ષેત્રજ્ઞમાસીનં તસ્મૈ ક્ષેત્રાત્મને નમઃ ॥ ૩૩॥

યં દૃગાત્માનમાત્મસ્થં વૃતં ષોડશભિર્ગુણૈઃ ।
પ્રાહુઃ સપ્તદશં સાઙ્ખ્યાસ્તસ્મૈ સાઙ્ખ્યાત્મને નમઃ ॥ ૩૪॥

યં વિનિદ્રા જિતશ્વાસાઃ સત્ત્વસ્થાઃ સંયતેન્દ્રિયાઃ ।
જ્યોતિઃ પશ્યન્તિ યુઞ્જાનાસ્તસ્મૈ યોગાત્મને નમઃ ॥ ૩૫॥

અપુણ્યપુણ્યોપરમે યં પુનર્ભવનિર્ભયાઃ ।
શાન્તાઃ સંન્યાસિનો યાન્તિ તસ્મૈ મોક્ષાત્મને નમઃ ॥ ૩૬॥

યોઽસૌ યુગસહસ્રાન્તે પ્રદીપ્તાર્ચિર્વિભાવસુઃ ।
સમ્ભક્ષયતિ ભૂતાનિ તસ્મૈ ઘોરાત્મને નમઃ ॥ ૩૭॥

સમ્ભક્ષ્ય સર્વભૂતાનિ કૃત્વા ચૈકાર્ણવં જગત્ ।
બાલઃ સ્વપિતિ યશ્ચૈકસ્તસ્મૈ માયાત્મને નમઃ ॥ ૩૮॥

સહસ્રશિરસે તસ્મૈ પુરુષાયામિતાત્મને ।
ચતુઃસમુદ્રપર્યાયયોગનિદ્રાત્મને નમઃ ॥ ૩૯॥

અજસ્ય નાભાવધ્યેકં યસ્મિન્વિશ્વં પ્રતિષ્ઠિતમ્ ।
પુષ્કરં પુષ્કરાક્ષસ્ય તસ્મૈ પદ્માત્મને નમઃ ॥ ૪૦॥

યસ્ય કેશેષુ જીમૂતા નદ્યઃ સર્વાઙ્ગસન્ધિષુ ।
કુક્ષૌ સમુદ્રાશ્ચત્વારસ્તસ્મૈ તોયાત્મને નમઃ ॥ ૪૧॥

યુગેષ્વાવર્તતે યોંઽશૈર્દિનર્ત્વયનહાયનૈઃ ।
સર્ગપ્રલયયોઃ કર્તા તસ્મૈ કાલાત્મને નમઃ ॥ ૪૨॥

બ્રહ્મ વક્ત્રં ભુજૌ ક્ષત્રં કૃત્સ્નમૂરૂદરં વિશઃ ।
પાદૌ યસ્યાશ્રિતાઃ શૂદ્રાસ્તસ્મૈ વર્ણાત્મને નમઃ ॥ ૪૩॥

યસ્યાગ્નિરાસ્યં દ્યૌર્મૂર્ધા ખં નાભિશ્ચરણૌ ક્ષિતિઃ ।
સૂર્યશ્ચક્ષુર્દિશઃ શ્રોત્રે તસ્મૈ લોકાત્મને નમઃ ॥ ૪૪॥

વિષયે વર્તમાનાનાં યં તં વૈશેષિકૈર્ગુણૈઃ ।
પ્રાહુર્વિષયગોપ્તારં તસ્મૈ ગોપ્ત્રાત્મને નમઃ ॥ ૪૫॥

અન્નપાનેન્ધનમયો રસપ્રાણવિવર્ધનઃ ।
યો ધારયતિ ભૂતાનિ તસ્મૈ પ્રાણાત્મને નમઃ ॥ ૪૬॥

પરઃ કાલાત્પરો યજ્ઞાત્પરઃ સદસતોશ્ચ યઃ ।

અનાદિરાદિર્વિશ્વસ્ય તસ્મૈ વિશ્વાત્મને નમઃ ॥ ૪૭॥

યો મોહયતિ ભૂતાનિ સ્નેહરાગાનુબન્ધનૈઃ ।
સર્ગસ્ય રક્ષણાર્થાય તસ્મૈ મોહાત્મને નમઃ ॥ ૪૮॥

આત્મજ્ઞાનમિદં જ્ઞાનં જ્ઞાત્વા પઞ્ચસ્વવસ્થિતમ્ ।
યં જ્ઞાનિનોઽધિગચ્છન્તિ તસ્મૈ જ્ઞાનાત્મને નમઃ ॥ ૪૯॥

અપ્રમેયશરીરાય સર્વતોઽનન્તચક્ષુષે ।
અપારપરિમેયાય તસ્મૈ ચિન્ત્યાત્મને નમઃ ॥ ૫૦॥

જટિને દણ્ડિને નિત્યં લમ્બોદરશરીરિણે ।
કમણ્ડલુનિષઙ્ગાય તસ્મૈ બ્રહ્માત્મને નમઃ ॥ ૫૧॥

શૂલિને ત્રિદશેશાય ત્ર્યમ્બકાય મહાત્મને ।
ભસ્મદિગ્ધોર્ધ્વલિઙ્ગાય તસ્મૈ રુદ્રાત્મને નમઃ ॥ ૫૨॥

પઞ્ચભૂતાત્મભૂતાય ભૂતાદિનિધનાત્મને ।
અક્રોધદ્રોહમોહાય તસ્મૈ શાન્તાત્મને નમઃ ॥ ૫૩॥

યસ્મિન્સર્વં યતઃ સર્વં યઃ સર્વં સર્વતશ્ચ યઃ ।
યશ્ચ સર્વમયો નિત્યં તસ્મૈ સર્વાત્મને નમઃ ॥ ૫૪॥

વિશ્વકર્મન્નમસ્તેઽસ્તુ વિશ્વાત્મન્વિશ્વસમ્ભવ ।
અપવર્ગોઽસિ ભૂતાનાં પઞ્ચાનાં પરતઃ સ્થિતઃ ॥ ૫૫॥

નમસ્તે ત્રિષુ લોકેષુ નમસ્તે પરતસ્ત્રિષુ ।
નમસ્તે દિક્ષુ સર્વાસુ ત્વં હિ સર્વપરાયણમ્ ॥ ૫૬॥

નમસ્તે ભગવન્વિષ્ણો લોકાનાં પ્રભવાપ્યય ।
ત્વં હિ કર્તા હૃષીકેશ સંહર્તા ચાપરાજિતઃ ॥ ૫૭॥

તેન પશ્યામિ તે દિવ્યાન્ભાવાન્હિ ત્રિષુ વર્ત્મસુ ।
તચ્ચ પશ્યામિ તત્ત્વેન યત્તે રૂપં સનાતનમ્ ॥ ૫૮॥

દિવં તે શિરસા વ્યાપ્તં પદ્ભ્યાં દેવી વસુન્ધરા ।
વિક્રમેણ ત્રયો લોકાઃ પુરુષોઽસિ સનાતનઃ ॥ ૫૯॥

અતસીપુષ્પસઙ્કાશં પીતવાસસમચ્યુતમ્ ।
યે નમસ્યન્તિ ગોવિન્દં ન તેષાં વિદ્યતે ભયમ્ ॥ ૬૦॥

યથા વિષ્ણુમયં સત્યં યથા વિષ્ણુમયં હવિઃ ।
યથા વિષ્ણુમયં સર્વં પાપ્મા મે નશ્યતાં તથા ॥ ૬૧॥

ત્વાં પ્રપન્નાય ભક્તાય ગતિમિષ્ટાં જિગીષવે ।
યચ્છ્રેયઃ પુણ્ડરીકાક્ષ તદ્ધ્યાયસ્વ સુરોત્તમ ॥ ૬૨॥

ઇતિ વિદ્યાતપોયોનિરયોનિર્વિષ્ણુરીડિતઃ ।
વાગ્યજ્ઞેનાર્ચિતો દેવઃ પ્રીયતાં મે જનાર્દનઃ ॥ ૬૩॥

ઇતિ મહાભારતે શાન્તિપર્વણિ ૪૭ અધ્યાયાન્તર્ગતં
ભીષ્મકૃતં શ્રીકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । શાન્તિપર્વ । અધ્યાય ૪૭/૧૦-૬૩॥

mahAbhArata . shAntiparva . adhyAya 47/10-63..

Proofread by PSA Easwaran

---

*Bhishmakritam 2 Shri Krishna Stotram*

pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*